# Shri Dharmanandana Stotram

# શ્રીધર્મનન્દનસ્તોત્રમ્

## Document Information

Text title : Shri Dharmanandana Stotram

File name : dharmanandanastotram.itx

Category : vishhnu, svAminArAyaNa, krishna, stotra, aShTaka

Location : doc_vishhnu

Author : achintyAnandabrahmachArI

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીધર્મનન્દનસ્તોત્રમ્

(હરિગીત છન્દ)

સિતસાન્દ્ર-સદ્વસનાલિનં વરમાલ્યમઞ્જુલમાલિનં
ચલિતાલિનં પૃથુમાલિનં નવપુષ્પભૂષણશાલિનમ્ ।
વૃષપાલિનં શ્રિતલાલિનં જપમાલિકા-પરિચાલિનં
પ્રણમામિ ધર્મસુતં હરિં શુભકારિ-સદ્ગુણમાલિનમ્ ॥ ૧॥

મલજાલભૃત્-કલિકણ્ડનં જનમિત્ર-સજ્જનમણ્ડનં
સ્મરતણ્ડનં મદભણ્ડનં કૃતદુષ્ટમાનવ-દણ્ડનમ્ ।
જિત-ચણ્ડનં સ્મયકણ્ડનં કૃતભૂરિ-દુર્મતખણ્ડનં
પ્રણમામિ ધર્મસુતં હરિં શુભકારિ-સદ્ગુણમાલિનમ્ ॥ ૨॥

વૃષવૈરિ-દર્પવિદારિણં શ્રિતજાત-સંસૃતિહારિણં
અવતારણં શુભકારિણં મણિહેમ-ભૂષણધારિણમ્ ।
જનભન્દનં મુનિવન્દનં પરિચર્ચિતોત્તમચન્દનં
પ્રણમામિ ધર્મસુતં હરિં શુભકારિ-સદ્ગુણમાલિનમ્ ॥ ૩॥

જિતદોષણં શ્રિતતોષણં કૃતધર્મવંશ-વિપોષણં
ક્ષતરોષણં શ્રુતજોષણં નિજભક્ત-માનસપોષણમ્ ।
જનબોધનં મતિશોધનં પ્રિયનમ્ર-શાન્ત-તપોધનં
પ્રણમામિ ધર્મસુતં હરિં શુભકારિ-સદ્ગુણમાલિનમ્ ॥ ૪॥

હૃતભક્તિ-મજ્જનવાસનં શતકોટિભાસ્કરભાસનં
જનશાસનં ગરુડાસનં સ્વનુરક્તભક્ત-સભાસનમ્ ।
હૃતશોચનં ઘનરોચનં કૃતબદ્ધજીવ-વિમોચનં
પ્રણમામિ ધર્મસુતં હરિં શુભકારિ-સદ્ગુણમાલિનમ્ ॥ ૫॥

ભુવનોદ્ભવાદિવિધાયિનં ભવહારિ-સદ્ગુણનાયિનં
અનપાયિનિં સુખદાયિનં હિતકારિ-સજ્જનયાયિનમ્ ।
જનપાવનં સ્વજનાવનં શુભધર્મભક્તિ-વિભાવનં

પ્રણમામિ ધર્મસુતં હરિં શુભકારિ-સદ્ગુણમાલિનમ્ ॥ ૬॥

નિજભક્ત-પદ્મવિકાશિનં દુરતિક્રમાર્તિ-વિનાશિનં
સ્વવિલાસિનં મતિદાશિનં પ્રિયદમ્ભહીન-નિરાશિનમ્ ।
ક્ષતખેદનં શુભવેદનં યમદૂત-ભીતિવિભેદનં
પ્રણમામિ ધર્મસુતં હરિં શુભકારિ-સદ્ગુણમાલિનમ્ ॥ ૭॥

અસુરાંશ-દેશિકગઞ્જનં શ્રિતવૃન્દ-માનસ-મઞ્જનં
નિજરઞ્જનં ભવભઞ્જનં ગુણનીરરાશિ-નિરઞ્જનમ્ ।
મુનિમાનનં પ્રિયકાનનં નવપદ્મચન્દ્ર-વરાનનં
પ્રણમામિ ધર્મસુતં હરિં શુભકારિ-સદ્ગુણમાલિનમ્ ॥ ૮॥

નૃપદેવમુક્ત-સભાજિતં શ્રુતિશાસ્ત્રવેદિ-સભાજિતં
સકલાજિતં સુજનાજિતં ગુણભાજિવાજિ-નિરાજિતમ્ ।
શ્રિતનોદનં મુનિમોદનં દલિતક્ષમા-ખિલતોદનં
પ્રણમામિ ધર્મસુતં હરિં શુભકારિ-સદ્ગુણમાલિનમ્ ॥ ૯॥

શ્રી અચિન્ત્યાનન્દબ્રહ્મચારીવિરચિતં શ્રીધર્મનન્દનસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Shri Dharmanandana Stotram*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*